# श्रीकृष्णलीलास्तुतिः

निगमतरोः प्रतिशाखं मृगितं च मया परं ब्रह्म ।
मिलितमिदानीमङ्के गोकुलपङ्केरुहाक्षीणाम ॥

तप्तं तपोभिरन्यैः फलितं च तद्गोपबालानाम ।
आसां यत्कुचकुम्भे नीलनिचोलायते परम्ब्रह्म ॥

श्रुतिमपरे स्मृतिमपरे भारतमन्ये भजन्तु भवभीताः ।
अहमपि नन्दं वन्दे यस्यालिन्दे परम्ब्रह्म ॥

कि कथयामः कस्मै कस्य मनः प्रत्ययमाधत्ते ।
रमयति गोपवधूटीकुञ्जकुटीरे परम्ब्रह्म ॥

नीतन्नीतं नवनवनीतं केन च पीतं पयः क्क मे मुरली ।
इति समुदीर्य लुठन्तं भूमौ बालं नमामि गोपालं सम्पूर्णम ॥

पश्यत बलमबलानामनाविले हृद्बिले बबन्धुर्योः ।
तनुदृष्टिपातरश्म्याऽऽकृष्टममूर्तं परम्ब्रह्म ॥

एतत्त्वामहमर्थयामि सततं रे चित्त चिन्तातुर
 मा चिन्तां कुरु चञ्चलेषु विषयेष्वागारदारादिषु ।
गायन्तं यमुनातटद्रुमतले नीलाम्बुदश्यामलं
 गोपालं वनमालिनं कमलिनं नन्दात्मजं चिन्तय ॥

ध्यानाभ्यासवशीकृतेन मनसा तन्निर्गुणं निष्क्रियं
 ज्योतिः किञ्चन योगिनो यदि परं पश्यन्ति पश्यन्तु ते ।
अस्माकं तु तदेव लोचनचमत्काराय भूयाच्चिरं
 कालिन्दीपुलिनेषु तत्किमपि यन्नीलं तमो धावति ॥

इति श्रीकृष्णलीलास्तुतिः समाप्ता ।